National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 163-167
© 2025 NJHSR
www.sanskritarticle.com

**प्रवीणः एम्. सज्जनः**
शोधच्छात्रः (Ph.D.),
कर्नाटकसंस्कृतविश्वविद्यालयः,
बैंगलोर

**Correspondence:**
**प्रवीणः एम्. सज्जनः**
शोधच्छात्रः (Ph.D.),
कर्नाटकसंस्कृतविश्वविद्यालयः,
बैंगलोर

# न्यायवैशेषिकनये, अद्वैतनये च अन्यथासिद्धिविषयकम् एकं तात्त्विकमध्ययनम्

**प्रवीणः एम्. सज्जनः**

**शोधसारः –**

कार्यकारणभावे वक्तव्ये बहुधा तत्र विप्रतिपत्तयः भवन्ति । तत्र कारणलक्षणं यत् तद् समन्वेति चेदपि बहूनां पदार्थानां कारणत्वं न सम्भवति तत्र हेतुः भवति अन्यथासिद्धत्त्वमिति । तत्र दीपिकायां मुक्तावल्ल्यां च अन्यथासिद्धिपञ्चकं निरूपितमस्ति । तत्रैव विशेषेण एकं विशेषाध्ययनपुरस्सरम् एकं शोधलेखं लिखितुं प्रयतमानः अस्मि।

**प्रथम अन्यथासिद्धिः –**

यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः । उदाहरणार्थं – यकार्यं प्रति घटं प्रति दण्डस्य पूर्ववृत्तता येन रूपेण दण्डत्वेन रूपेण गृह्यते तत्कार्यं प्रत घटं प्रति तद्रूपं दण्डत्वमिति अन्यथासिद्धमित्यर्थः।

घटं प्रति दण्डः दण्डत्वेन रूपेण कारणं मास्तु पृथिवीत्वेन उत द्रव्यत्वेन कारणं भवतु इति चेत् न अन्येन पटेनापि घतोत्पत्तिः स्यादति क्लेस्शः भवति इत्यतः दण्डत्वेन रूपेणैव कारणम्।

**द्वितीय अन्यथासिद्धिः**

यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ नस्तः, किन्तु कारणमादायैव अन्वयव्यतिरेकौ गृह्यते तद् जन्यथासिद्धम्। यस्य दण्डरूपस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः, किन्तु कारणमादायैव दण्डमादायैव अन्यवव्यतिरेकौ गृह्यते तद् दण्डरूपमन्यथासिद्धम्।

**तृतीय- अन्यथासिद्धिः**

अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम्।

शब्दं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य आकाशस्य यत्कार्यं प्रति घटं प्रति पूर्ववृत्तित्वं गृह्यते तस्य आकाशस्य तत्कायं प्रति घटं प्रति अन्यथासिद्धत्वम्। घटं प्रति आकाशः केन रूपेण आकाशत्वेन रूपेण आकाशत्वं नाम न जातिः जातबाधकस्य सत्त्वात् तर्हि केन रपेण इति चेत् शब्दसमवायिकारणत्वेन रूपेण एवं च आकाशस्य शब्दसमवायिकारणत्वात् एव अन्यथासिद्धः इदानीमाक्षेपः शब्दाश्रयत्वेन रूपेण कारणं भवतु तदा तु अन्यथासिद्धत्वं वक्तुं न शक्यते यतः पूर्ववृत्तित्वं न आगच्छति तस्मात् कारणं घटं प्रति भवति खिल इत्याक्षेपे आकाशस्य अन्यथासिद्धत्वं लभ्यते इति। आकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् अर्थात् आकाश निष्ठ कारणता किमवच्छेदिका इति प्रश्ने शब्दत्वं भवितुं नार्हति यतः शब्दत्वं शब्दे एव इति कृत्वा अतः कवत्वं खवत्वादकं स्वीक्रियते तत्र विनिगमनाविरहात् परमाण्वोः भेदसम्पादकः विशेषपदार्थः स्वीक्रियते ।

**चतुर्थः अन्यथासिद्धिः**

यत्कार्यजनंप्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् –

यत्कार्यं जनकं कुलालं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य कुलालपितुः यत्कार्यं प्रति घटं प्रति पूर्ववृत्तित्वं गृह्यते तस्य कुलालपितुः तत्कार्यं प्रति घटं प्रति अन्यथासिद्धत्वम्। तस्मात् घटं प्रति कुलालपितुः अपि कारणत्वं भवतु इति चेत् न यतः कुलालपित्रा अपि घटोत्पादने सहाय्यं वर्तते अथवा कर्तृत्वं वर्तते तर्हि इष्टापत्तिः ।

**पञ्चमः अन्यथासिद्धिः**

अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धम् पाकजस्थले गन्धं प्रति गन्धप्रागभावस्य अवश्यनियतक्लृप्तत्वं वर्तते। तेनैव कार्यसंभवे तद्भिन्नं रूपप्रागभावः अन्यथासिद्धः। अवश्यमिति इह कुतः उक्तं दीपिकायां तु अन्यत्र इत्यक्तमिति चेत् नियत्त्वे अवश्यक्लृप्तत्वं नाम किमिति प्रश्ने लघुधर्मावच्छिन्नत्वम् तच्च लघुत्वं किं निष्ठमिति चेत् त्रतयनिष्ठं तच्च

शरीरकृतम् – लघुत्वम्
उपस्थितिकृतम्- लघुत्वम्
सम्बन्धकृतम्- लघुत्वम्

सम्बन्धकृतं लाघवम् – घटं प्रति दण्डरूपस्य स्वजन्यभ्रमि-जन्यभ्रमिमत्ता सम्बन्धेन करणम्

घटं प्रति दण्डरूपस्य तु स्वाश्रयजन्यभ्रमिजन्यमत्तासम्बन्धेन एतादृश सम्बन्धेन करणं भवति एवञ्च दण्डरूपस्य सम्बन्धे आधिक्यं दण्डस्य सम्बन्धिकृतं लाघवमस्तीति कृत्वा तदेव कारणं भवति अवश्यनियतक्लृप्तं भवति दण्डः एतेनैव कार्य सम्भवे तत्सहभूतं दण्डरूपम् अन्यथासिद्धत्वम्।

उपस्थितिकृतं लाघवम्- गन्धं प्रति प्रतियोगिकः अभावः तस्यैव गन्धप्रागभावस्यैव प्रथमोपस्थिति तदनन्तरं रूपप्रागभावस्य उपस्तिथिः इत्यतः उपस्थितिकृतं लाघवं तु गन्धप्रागभावे वर्तते इत्यतः अवश्यक्लृप्तनियत्त्वं गन्धप्रागभावे आयातम् एतेनैव कार्यसम्भवे तत्सहभूतमन्यथासिद्धं रूपप्रागभावः अन्यथासिद्धः ।

त्यक्तोविचारः पूर्यते

क्लृप्तनियतपूर्ववृत्तित्वे अवश्यक्लृप्तत्वं नाम किमिति पृष्टे यस्य कारणस्य क्लृप्तत्वं ज्ञातं तद् भवति अवश्यक्लृप्तत्वं ज्ञातं तद्भवति अवश्यक्लृप्तं एव यदि उच्यते तर्हि आत्माश्रयो दोषः यतः कारणमुपपादयितुं अन्यथासिद्धिः उच्यते पुनः अन्यथासिद्धि-मुपपादयितं पुनः कारणत्वलघुत्वमिति उच्यते तच्च त्रिविधम्। तत्र द्वयमुपपादितम् इतोपि एकं शरीरकृत लाघवमुपपाद्यते।

**शरीरकृतं लाघवम्**

प्रत्यक्षं प्रति महत्त्वं पुनश्च अनेकद्रव्यवत्त्वमिति द्वयं कारणत्वेन प्राप्तं तत्र कारणतावच्छेदं अनेकद्रवव्यवत्वत्वं भवति उत महत्वत्त्वं भवति उभयोर्मध्ये महत्वत्त्वस्यैव लाघवात् अवश्यक्लृप्तनियतपूर्ववृत्ति महत्त्वं भवति। एतेनैव कार्यसम्भवे तत्सहभूतं अनेकद्रव्यवत्त्वमिति अन्यथासिद्धम् इत्यर्थः। यदि अन्यत्र क्लप्तनियतपूर्ववृत्ति अन्यथासिद्धम् ति यदि दीपिकोक्तरीत्या स्वीक्रियते तर्हि एतस्य अनेकद्रव्यवत्त्वस्य अपि कारणत्वं स्यात् अतः अवश्यमिति पठितम्। कथमिति चेत् अनेकद्रव्यवत्वं नाम अनेकद्रवव्यसमवेतत्वमिति यदि वदामः तर्हि द्व्यणुकस्यापि प्रत्यक्षत्वापत्तिः ।

न एकमनेकं द्रव्यं नाम द्व्यणुकं परमाणौ समवेतमित्यतः द्व्यणुके आयातमिति कत्वा एतस्य अपि प्रत्यक्षत्वापत्तिः स्यादिति दोषः। अतः अनेकद्रव्यवत्त्वं पुनश्च महत्त्वमपि त्र्यणुकादारभ्यभवति तस्मात् प्रत्यक्षं प्रति कस्य अन्यथासिद्धत्वमिति वक्तुं दीपिकास्थरूपेण तु न शक्यते यतः अन्यत्र अनेकद्रवव्यवत्वे क्लृप्तनियतपूर्ववृत्तित्वमेव वक्तुं न शक्यते यतः यत्र महत्त्वं तत्र सर्वत्रापि अनेकद्रव्यवत्त्वमिति जातम्। तस्मात् अत्र अन्यथासिद्धिञ् वक्तुं न शक्यते। अतः अवश्यक्लृप्तत्त्वमिति उक्तम्।

एवं चेत् शरीरकृतलाघवेन तस्य् आन्यथासिद्धत्वं वक्तुं शक्यते । इदं च दिनकरीस्थं वर्तते।

पूर्वतन विचारः

आकाशत्वमिति शब्दाश्रयत्वेन कारणमिति यदि स्वीकियते तर्हि पञ्चमी इति गृहाण इत्युक्तमासीत्। अतः इदानीमुच्यते अवश्यक्लप्तनियतपूर्ववर्तिना एव कार्यसम्भवे दण्डेनैव कार्यसम्भवे तद्भिन्नं आकाशहू अन्यथासिद्धः ।

रासभोपि अन्यथासिद्धः – अनेकद्रव्यसमेवेतत्वस्वीकारे दोषः भवतीति कृत्वा अणुभिन्नत्वमिति अर्थः स्वीक्रियते ।

**भूमिका**

भारतीयतर्कपरम्परायां कार्यकारणभावः प्रमाणसिद्धः विषयः। यत्र कारणं विना कार्यस्य सिद्धिर्न सम्भवति, स एव कारणकार्यभावः। किन्तु अनुमाने हेतोः प्रयोगे यदि साध्यसिद्धिः हेत्वभावेऽपि अन्येन कारणेन सिद्धा भवति, तर्हि सः हेतुः अन्यथासिद्धः इति दोषेण दूष्यते। अन्यथासिद्धिः नाम हेत्वाभासेषु सूक्ष्मतमो दोषः।

सन्दर्भः –
तर्कसंग्रहः, हेत्वाभासनिरूपणप्रकरणम्

2. अन्यथासिद्धेः परिभाषा

न्यायभाष्यकाराः अन्यथासिद्धिं एवं परिभाषयन्ति—
यस्य साध्यसिद्धिः हेत्वभावेऽपि अन्येन कारणेन सिद्धा भवति स हेतुः अन्यथासिद्धः|

अर्थात्, यत्र साध्यं स्वतन्त्रकारणेनैव सिद्धं, तत्र हेतोः प्रयोजनाभावात् हेतुः असिद्ध एव भवति।

सन्दर्भाः – तर्कसंग्रहः – अन्नम्भट्टः

तर्कसंग्रहदीपिका – गदाधरभट्टाचार्यः

3. कार्यकारणभावे अन्यथासिद्धिः

कार्यकारणभावस्य मुख्यलक्षणं अनन्यकारणत्वम्। यदि कार्यं कारणाभावेऽपि अन्येन उपायेन सिद्धं भवति, तर्हि कारणस्य कार्ये अनिवार्यता न सिध्यति। अयं दोषः अन्यथासिद्धिरूपेण निर्दिश्यते। उदाहरणम्— घटो दृश्यः, रूपवत्त्वात्।

अत्र दृश्यत्वं रूपात् न, अपि तु प्रकाशसंयोगात् सिद्ध्यति। अतः रूपवत्त्वं दृश्यत्वस्य साधनं न, किन्तु अन्यथासिद्धम्। सन्दर्भः – न्यायसिद्धान्तमुक्तावली – विश्वनाथपञ्चाननः

4. अन्यथासिद्धेः प्रकाराः नैयायिकैः सामान्यतः द्वौ भेदौ स्वीक्रियते—

साध्यस्य अन्यथासिद्धिः – साध्यं स्वतन्त्रकारणेन सिद्धम्।

साधनस्य अन्यथासिद्धिः –साधनं कार्ये अनावश्यकम्।

सन्दर्भाः – तर्कसंग्रहः न्यायदर्शनम् (प्रथमाध्यायः)

5. अन्यथासिद्धि बनाम व्यभिचारः

व्यभिचारदोषे साध्यसंबन्धः क्वचित् नास्ति, किन्तु अन्यथासिद्धौ साध्यसंबन्धः अस्ति, परन्तु अनावश्यकः। "संबन्धे सति अनुपयोगित्वं अन्यथासिद्धिः।" सन्दर्भः – न्यायभाष्यम् – वात्स्यायनः| न्यायकुसुमाञ्जलिः – उदयनाचार्यः 6. अद्वैतवेदान्तदृष्ट्या अन्यथासिद्धिः| अद्वैतवेदान्ते कार्यकारणभावः व्यवहारिकसत्तायामेव स्वीकृतः। परमार्थतः ब्रह्मणि न कार्यं न कारणम्। शङ्कराचार्यः लिखति—"कार्यकारणप्रपञ्चोऽयं अविद्याकल्पितः।"[1] अतः ब्रह्मज्ञानात् कार्यकारणभावस्य बाधेन, तस्य सिद्धिः अन्यथैव (ब्रह्मसत्तया) भवति।सन्दर्भाः –

विवेकचूडामणिः (कार्यकारणविवेचनप्रकरणम्)

तत्र अज्ञानस्य कारणत्वं वा अन्यथासिद्धत्वं वा इति प्रश्ने क्रियमाणे तत्र अज्ञानस्य कारणत्वमेव इति सिद्धम् । तस्मात् कारणात् अन्यथासिद्धः न इत्ति अत्र साध्यते – अद्वैतवेदान्ते तु अद्वैतवेदान्ते ब्रह्मैव परमार्थसत्यं, नित्यं, निर्विकारं च। तथापि व्यवहारिकसत्तायां जगत्प्रपञ्चः दृश्यते। अस्य प्रपञ्चस्य कारणं किं?—इति प्रश्ने अद्वैतवेदान्तिनः **अज्ञानमेव कारणम्** इति प्रतिपादयन्ति। ब्रह्मणः निर्विकारत्वात् तस्मात् कार्यकारणभावः न सम्भवति; अतः कार्यरूपस्य जगतः कारणत्वं **अज्ञानस्य** एव उपपद्यते।

**2. अज्ञानस्य स्वरूपनिर्णयः**

अज्ञानं न सत्, नासत्, किन्तु **सदसदनिन्वचनीयम्**। तत् ब्रह्मणि अधिष्ठाने आरोपितं, जीवस्य अनुभवगोचरं, ज्ञाननिवर्त्यम्।

शङ्कराचार्यः स्पष्टयति—

**"अविद्या नाम ब्रह्मणि अनादिरध्यासः।"**

अत्र अज्ञानं न वस्तुतः ब्रह्मणः धर्मः, किन्तु अध्यासरूपः।

**सन्दर्भः –**

- ब्रह्मसूत्रशाङ्करभाष्यम्, आद्यासभाष्यम्

**3. अज्ञानस्य कारणत्वस्य आवश्यकता**

यदि ब्रह्मैव जगत्कारणं स्वीक्रियते, तर्हि—

- ब्रह्मणः विकारित्वं प्रसज्येत
- द्वैतापत्तिः स्यात्
- श्रुतिविरोधः स्यात्

अतः अद्वैते जगत्कारणत्वं **ब्रह्मणः न**, किन्तु **ब्रह्माश्रितस्य अज्ञानस्य**।

**"अज्ञानोपाधिसंबन्धात् ब्रह्मणः कर्तृत्वादिव्यवहारः।"**

**अज्ञानं उपादानकारणं वा?**

अद्वैतदृष्ट्या अज्ञानं **विवर्तोपादानकारणम्**, न परिणामोपादान-कारणम्।

**"यथा रज्जौ सर्पकल्पना, तथा ब्रह्मणि जगत्कल्पना।"**

अत्र—

- रज्जुः = ब्रह्म
- सर्पः = जगत्
- अज्ञानम् = सर्पकल्पनाया कारणम्

अतः जगतः उपादानं ब्रह्म न, किन्तु **अज्ञानम्**।

**सन्दर्भः –**

- ब्रह्मसूत्रभाष्यम् 2.1.14
- उपदेशसाहस्री – शङ्कराचार्यः

**6. श्रुतिप्रमाणैः अज्ञानकारणत्वसमर्थनम्**

श्रुतेः अपि अज्ञानस्य कारणत्वं सूच्यते—

**"नेह नानास्ति किञ्चन"** (बृहदारण्यकोपनिषद् 4.4.19)

**"यत्र हि द्वैतमिव भवति"** (बृहदारण्यक 2.4.14)

द्वैतस्य *इव* इति शब्दः अज्ञानकल्पितत्वं दर्शयति।

**सन्दर्भः –**

- बृहदारण्यकोपनिषद्भाष्यम् – शङ्कराचार्यः

**7. अन्यथासिद्धि-दृष्ट्या अज्ञानकारणत्वम्**

कार्यकारणभावे अद्वैते अज्ञानं कारणं, किन्तु परमार्थतः—

- न कार्यम्
- न कारणम्

अतः अज्ञानस्य कारणत्वं **व्यवहारिकसत्तायामेव**, परमार्थतः तदपि **अन्यथासिद्धम्**।

**"ज्ञानोदयात् अज्ञानस्य सर्वथा बाधः।"**

**सन्दर्भः –**

- विवेकचूडामणिः
- पञ्चदशी – विद्यारण्यः

अज्ञानं नाम – **"सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित् इति वदन्ति"**[2] इति वेदान्तसारे उच्यते तत्र अज्ञानस्य यदि सद्रूपत्वं तर्हि अद्वैतहानिः – केवलस्य ब्रह्मणः एव सद्रूपत्वं भवितुमर्हति यतः एकेनैव सर्वानुगतेन सत्त्वेन सर्वत्र

सत्प्रतीत्युपपत्तौ ब्रह्मवत् प्रत्येकं प्रपञ्चस्य सत्स्वभावताकल्पने मानाभावात्, अनुगतव्यवहाराभावप्रसङ्गाच्च। इत्येवं यदि प्रपञ्चस्य पृथक् सत्ता कल्प्यते तदा तु अनुगतव्यवहारः न स्यात् घटः सन् , पटः सन् इत्येवं तस्मात् कारणात् ब्रह्मणः केवलस्य सद्रूपत्वं वक्तव्यं नान्यस्य, तस्मात् अज्ञानस्य सद्रूपत्वं न वक्तुं शक्यते, अपि च अज्ञानस्य असद्रूपत्वं वदामः इत्यपि न शक्यते वक्तुं यतः शशविषाणवत् अत्यन्तं तुच्छः पदार्थः अयं नास्ति । किञ्च असद्रूपं चेत् कारणत्वानुपपत्तेः तस्मात् सदसद्रुपमिति वदामः इति चेत् विरोधात् न शक्यते – तस्मात् सदसदभावरूपमित्येव वक्तव्यमित्यभिप्रायः। एवं सदसद्भ्यामनिर्वचनीयं इति उक्ते सति सद् अपि न असद् अपि न इति कथनात् एतादृशः पदार्थः एव न स्यात् इति मन्यते चेत् तदा वक्तव्यं यत् त्रिगुणात्मकम् इति । त्रिगुणात्मकमिति कः अर्थः इति चेत् सत्वरजस्तमो रूपगुणात्मकमित्यर्थः तत्र अजामेकां लोहतशुक्लकृष्णां इत्यादि श्रुतिभ्यः इदमज्ञानमेकमव इति ज्ञायते तत्र व्योमादिरूपेण परिणतस्य सत्यवद्भासमानत्वेन संसारानिवृत्तिः स्यात् इति चेत् उच्यते यत् – ज्ञानवरोधि इति अर्थात् तत्र ज्ञानविरोधि इति कथनात् एतस्य अज्ञानस्य नाशः अवगम्यते अर्थात् बाध्यत्वं अवगम्यते । तथा सति ज्ञानं तु भावरूपं अज्ञानं तु अभावरूपमिति चिन्तयेत् कश्चित् इति अग्रिमं दलमुच्यते यत् भावरूपमिति । तस्मात् दलकृत्य पुरस्सरं अज्ञानस्य लक्षणं वेदान्तसारोक्तदिशा चिन्तितम् । तत्र स्मृतस्य उपेक्षा अनर्हत्वात् – प्रकृते प्रमाणव्यापरस्य विषये चिन्त्यमाने अज्ञाननाशपर्यन्तं प्रमाणव्यापारः भवति इति उक्तदिशा तत्र अज्ञानं कीदृशं किं तत् कतिविधमित्यादि जिज्ञासा भवत्येव अतः कारणात् अज्ञानस्य विषयः इह प्रस्तुतः वर्तते । अयं च विषयः माण्डूक्योपनिषदि वर्तते – तत्र अग्रे च अयं विषयः कथितः इति तदुच्यते अधुना - माण्डूक्योपनिषदः अन्तिमे भागे अकार, उकार, मकाराणां प्रतीकात्मकं विवेचनं क्रियते — एते त्रयोऽपि ओंकारस्य मात्राः भवन्ति, यैः चतुर्थं तुरीयं च दर्श्यते। अत्र तेषां विषये सक्षेपेण विवरणं प्रदत्तम् —

अकारः ( 'अ' मात्रा ) — प्रथमः पादः

- स्थूलशरीरस्य प्रतीकः — जागरितावस्था।
- विश्व इति ज्ञायते — बहिःप्रज्ञः (बाह्यवस्तुषु ज्ञानम्)।
- सर्वारम्भाणां आदि रूपत्वात् — "अ" सर्ववर्णेषु आद्यः।
- फलम् — इच्छादीनां सिद्धिः (प्रारम्भशक्तिः)।

उकारः ( 'उ' मात्रा ) — द्वितीयः पादः

- सूक्ष्मशरीरस्य प्रतीकः — स्वप्नावस्था।
- तैजस इति ज्ञायते — अन्तरप्रज्ञः (अन्तर्विषयेषु चित्तवृत्तिः)।
- मध्यत्वात्, उत्कर्षात् — "उ" मध्ये स्थितः, उच्चगमनसूचकः।
- फलम् — ज्ञानस्य उत्कर्षः (सम्यग्दर्शनम्)।

मकारः ( 'म' मात्रा ) — तृतीयः पादः

- कारणशरीरस्य प्रतीकः — सुषुप्तावस्था।
- प्राज्ञ इति ज्ञायते — एकीभूतप्रज्ञः (वस्तुसंस्कारमात्ररूपः)।
- मीलनं, लयनं च सूचयति — अन्ते स्थितत्वात्।
- फलम् — उपशमः, शान्तिः, प्रवेशः ब्रह्मणि।

अमान्तं तुरीयं (मात्रातीतं)

- मौनं एव प्रतीकः — न शब्दः, न मात्रा।
- न जाग्रत्, न स्वप्न, न सुषुप्तिः — किन्तु सर्वेषामपि साक्षी।
- शान्तम्, शिवम्, अद्वैतम् — एष ब्रह्म स्वरूपम्।

इत्येतत् माण्डूक्योपनिषदस्य अकार-उकार-मकार-विवेचनम् साङ्क्षेपिकरूपेण अत्र प्रदत्तं वर्तते।

**अकारः (प्रथममात्रा)**

**"सोऽयमात्माध्यक्षरमोंकारः। अधिमात्रा पादा मात्रा, मात्राश्च पादा अक्षरस्य। य एवं वेद। तस्योपव्याख्यानं भवति। जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा, आप्तेरादिमत्त्वाद्वा।**

**एवं वेद य एवं वेद। स सर्वान्कामानाप्नोति, स आदिः भवति।"**[3]

**भावार्थः —**

जागरितावस्थायाम् स्थितः वैश्वानरः अकाररूपः, सर्वारम्भेषु आदि। य एवं वेद सः सर्वकामान् आप्नोति, आदित्वं लभते।

**उकारः (द्वितीया मात्रा)**

**"स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा, उत्कर्षात् उभावहित्वात् वा। एवं वेद य एवं वेद।**

**समानश्च भवति, नास्य ब्रह्मवित्कुले भवति।"**[4]

**भावार्थः —**

स्वप्नस्थ तैजसः उकारः। उत्कर्षं द्योतयति, मध्यभावं च।

य एवं वेद सः समत्वं प्राप्नोति, तस्य कुले ब्रह्मज्ञ न भवति (सर्वे ब्रह्मज्ञाः एव स्युः)।

**मकारः (तृतीया मात्रा)**

**"सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा, मीतेरपीतिलयात् वा। एवं वेद य एवं वेद।**

**स मीनते पितिलयति, एषा समृद्धिः, एष एवान्ततो भवति।"**[5]

**भावार्थः —**

सुषुप्तिस्थ प्राज्ञः मकाररूपः। लयनं द्योतयति।

य एवं वेद सः सर्वं लयति, समृद्धिं प्राप्नोति, मोक्षान्तं सञ्जायते।

**तुरीयं (मात्रातीतम्)**

**अमात्रश्चतुर्थः, अव्यवहार्यः, व्यवहारातीतः, अदृश्यः, अव्यवहार्यः, अग्राह्यः, अलक्षणः, अचिन्त्यः, अव्यपदेश्यः, एकात्मप्रत्ययसारं, प्रपञ्चोपशमं, शान्तं, शिवम्, अद्वैतम्—स आत्मा, स विज्ञेयः॥"**[6]

**भावार्थः —**

तुरीयं अमात्रम् अस्ति — न 'अ', 'उ', 'म' — किन्तु तेषां साक्षिभूतं चैतन्यमात्रं।

एष आत्मा — शान्तः, शिवः, अद्वैतः। स एव विज्ञेयः। इत्येवं अज्ञानविषये प्रत्यक्षप्रमाणस्य विषये च इह माण्डूक्योपनिषद् आधारेण यथामति मया प्रस्तुतं वर्तते । इतोपि एतत् विषये सिद्धान्तलेशसङ्ग्रहे प्रदत्तं यत्- ब्रह्मज्ञाननिवर्तकनिरूपणात् आरभ्य तत्र कथनं कृतं यत् ब्रह्मज्ञानं नाम अन्तःकरणवृत्तिविशेषः वर्तते। सः अपि वृत्तिविशेषत्वात् अज्ञानरूपमेव वर्तते । तत्र् तस्य कथं निवृत्तिः इति प्रश्ने तदा

उक्तं यत् – दग्धपटन्यायः कथितः **दग्धपटः** = अग्निना दग्धः पटः यः रूपतः दृश्यते, किन्तु तस्य वस्तुत्वं लुप्तम् अस्ति। स न वस्त्रस्वरूपेण कार्यक्षमः। एवं, ब्रह्मज्ञानं यद्यपि अन्तःकरणवृत्तिः, तथापि सः अज्ञानं नाशयति — अज्ञानस्य नाशे प्रपञ्चः नाशं याति — किन्तु एषा वृत्तिः अपि ज्ञानोपशमसमये अन्ततः लुप्यते। ततः केचित्तुकाराः एवं वदन्ति यत् – वृत्तिरूपं ब्रह्मज्ञानं नाज्ञानतन्मूलप्रपञ्चनिबर्हकं[7] इति अज्ञानं कवलं ज्ञानविरोधि तत् त्यक्त्वा अन्यत् सर्वमपि अज्ञानकार्यं वर्तते। तस्मात् प्रपञ्चस्य नाशः तावत् न ज्ञानेन अपि तु ज्ञानेन अज्ञानस्य नाशः ततः अज्ञानस्य नाशात् तत्कार्यस्य प्रपञ्चस्य नाशः भवति इति वर्तते । तस्मात् प्रपञ्चस्य साक्षात् ज्ञाननिवर्त्यत्वं नास्ति अपि तु परम्परासंबन्धेन एव तस्य नाशः इति वर्तते- स च परम्परासंबन्धः इत्थं वर्तते यत् – ज्ञाननिवर्त्याज्ञाननाश्यत्वम् इति एवं तत्र सिद्धान्तलेशसङ्ग्रहे कथनं कृतं वर्तते।

एवं विषयः इहापि दृष्टुं यग्यः **श्रीशङ्कराचार्यः** गीता-भाष्ये अपि उक्तवान् —**"अज्ञानोपाधिः आत्मा, तस्य अज्ञाननिवृत्त्या मुक्तिः"**[8] इति। तस्मात् प्रपञ्चस्य ज्ञाननाश्यत्वं अनुद्दिष्टम्। सः तु ज्ञानात् नष्टं अज्ञानं, ततः एव नष्टं प्रपञ्चमिथ्यात्वम्। अत्रैव "अद्वैतं शान्तं शिवम्" इति माण्डूक्योपनिषत्सूचयति —तुरीयस्य प्रतिपत्त्या मिथ्यात्वविवेकः, न तु साक्षात् प्रपञ्चविनाशः। निष्कर्षतः — सिद्धान्तलेशसङ्ग्रहव्याख्यायाः सारः —ज्ञानं → अज्ञाननाशकं अज्ञानं → प्रपञ्चकारणम् तस्मात् प्रपञ्चनाशः = परम्परया ज्ञानात् इत्येवं **"ज्ञानं न प्रपञ्चस्य साक्षान्नाशकं, किन्तु अज्ञानस्य"** — एष एव मूलवादः। माण्डूक्योपनिषदस्य तुरीयशान्तस्वरूपे अपि एषा एव प्रवृत्तिः दृष्टा। एतावता उक्तस्य लेखनस्य योंशः वर्तते सः अद्वैतवेदान्तस्य सिद्धान्तरूपः वर्तते।

**उपसंहारः**

कार्यकारणभावे यत्र कारणस्य अनिवार्यसहभावः न सिद्ध्यति, तत्र हेतोः प्रयोगः निष्फलः भवति। अन्यथासिद्धिदोषः तर्कशास्त्रे अनुमानस्य शुद्धतां रक्षति तथा अद्वैतवेदान्ते व्यवहारिकसत्ताया सीमां दर्शयति।

**"अनिवार्यकारणाभावे कार्यसिद्धिः अन्यथासिद्धिरिति निगद्यते।"**


**Bibliography / References**

**Primary Texts (संस्कृतग्रन्थाः)**

1. अन्नम्भट्टः – *तर्कसंग्रहः*
2. गदाधरभट्टाचार्यः – *तर्कसंग्रहदीपिका*
3. वात्स्यायनः – *न्यायभाष्यम्*
4. विश्वनाथपञ्चाननः – *न्यायसिद्धान्तमुक्तावली*
5. उदयनाचार्यः – *न्यायकुसुमाञ्जलिः*
6. शङ्कराचार्यः – *ब्रह्मसूत्रभाष्यम्*
7. शङ्कराचार्यः – *विवेकचूडामणिः*

**संदर्भः ग्रन्थः -**


[1] ब्रह्मसूत्रशाङ्करभाष्यम् 2.1.14

[2] वेदान्तसारः

[3] माण्डूक्योपनिषद् (८)

[4] माण्डूक्योपनिषद्(९)

[5] माण्डूक्योपनिषद्(१०)

[6] माण्डूक्योपनिषद्(१२)

[7] सिद्धान्तलेशसङ्ग्रहः(तृतीय परिच्छेदः)

[8] भगवद्गीताभाष्यम्